# उपसर्गा प्रत्ययाः च

## अभ्यासः

1. **उचितेन पदेन वाक्यानि पूरयत–**(उचित पद द्वारा वाक्य की पूर्ति कीजिए–)

**लेखितुम्, द्रष्टुम्, खादितुम्, रक्षितुम्, क्रीडितुम्।**

1. सः भोजनं ··············· न इच्छति।
2. छात्राः ··············· क्रीडाक्षेत्रम् गच्छन्ति।
3. वयम् विवेकानन्द स्मारकं ··············· अगच्छाम।
4. सैनिकाः देशं ··············· सज्जाः।
5. सा पत्रं ··············· कलमम् आनयति।

**उत्तरम्–**

1. खादितुम्, 3. क्रीडितुम्, 3. द्रष्टुम्, 4. रक्षितुम्, 5. लेखितुम्।

2. **उदाहरणम् अनुसृत्य रिक्तस्थानानि पूरयत–**(उदाहरण के अनुसार रिक्त स्थान को भरिए–)

**उदाहरणम्–**रावणं हत्वा **( हन् + क्त्वा )** रामः अयोध्यां प्रत्यागच्छत्। (हत्वा, हनित्वा, हन्त्वा)

1. राहुलः दुग्धम् ··············· **( पा + क्त्वा )** विद्यालयं गच्छति। (पात्वा, पीत्वा, पिबित्वा)
2. विद्यालयं ··············· **( गम् + क्त्वा )** अहं गुरुन् नमामि। (गमित्वा, गन्त्वा, गत्वा)
3. पुष्पाणि ··············· **( दृश् + क्त्वा )** कः प्रसन्नः न भवति ? (द्रष्ट्वा, दृष्ट्वा, दर्शित्वा)
4. देशं ··············· **( रक्ष् + क्त्वा )** वीराः सैनिकाः गर्वम् अनुभवन्ति। (रक्षत्वा, रक्षितवा)
5. तत्र ··············· **( स्था + क्त्वा )** त्वं किं करोषि ? (स्थात्वा, स्थित्वा, स्थीत्वा)

**उत्तरम्–**

1. पीत्वा, 2. गत्वा, 3. दृष्ट्वा, 4. रक्षित्वा, 5. स्थित्वा।

3. **मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयत–**(मञ्जूषा की सहायता से रिक्त स्थान पूरा कीजिए–)

| |
|---|
| **प्रणम्य, उपविश्य, आगम्य, उत्थाय, आनीय, निहत्य।** |

**उदाहरणम्–**छात्राः **उत्थाय** अध्यापिकां नमन्ति।

1. क्रीडाक्षेत्रात् ······························ सः हस्तपादं प्रक्षालयति।
2. गुरुम् ······························ शिष्यः अवदत्।
3. रावणं ······························ रामः सीताम् अयोध्याम् आनयत्।
4. सा पुस्तकम् ······························ काष्ठफलके अस्थापयत्।
5. खगः वृक्षे ······························ कूजति।

**उत्तरम्–**

1. आगम्य, 2. प्रणम्य, 3. निहत्य, 4. आनीय, 5. उपविश्य

4. **प्रकृति-प्रत्ययौ संयोजयत विभाजयत वा–**(प्रकृति-प्रत्यय जोड़िए अथवा पृथक् कीजिए–)

1. पीत्वा = .............. + ..............
2. हन् + तुमुन् = ..............
3. दत्वा = .............. + ..............
4. स्थित्वा = .............. + ..............
5. प्रच्छ् + क्त्वा = ..............
6. निहत्य = .............. + ..............
7. प्रष्टुम् = .............. + ..............
8. उत् + स्था + ल्यप् = ..............
9. प्रविश्य = .............. + .............. + ..............
10. उप + गम् + ल्यप् = ..................

**उत्तरम्–**

1. पा+क्त्वा, 2. हन्तुम्, 3. दा+क्त्वा, 4. स्था+क्त्वा, 5. पृष्ट्वा,
6. नि+हन्+ल्यप्, 7. प्रच्छ्+तुमुन्, 8. उत्थाय, 9. प्र+विश्+ल्यप्,
10. उपगम्य।

5. **अधोदत्तायाः सूच्याः उपसर्गान् प्रत्ययान् च विचित्य लिखित–**(निम्नलिखित सूची में से उपसर्ग और प्रत्यय छाँटकर लिखिए–)

क्त्वा, उप, परा, ल्यप्, तुमुन्, निः, निर्गम्य, दुर्गम, दुः, दुःखम्, दत्त्वा, दा, प्र, ति, गच्छन्ति, न्ति।

**उत्तरम्–**

उपसर्गाः – उप, परा, निः, प्र, दुः

प्रत्ययाः – क्त्वा, ल्यप्, तुमुन्, ति, न्ति